# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, नवम्बर/दिसम्बर-२०१६

| | | |
|---|---|---|
| **कक्षा- आचार्य-२ (SEM-3)** | **प्रश्नपत्र-२** | **गुणाः - ७०** |
| **विषयः- धर्मशास्त्रम्** | **CC537** | **समयः - ११ तः ०२** |
| **दिनाङ्कः - २५/११/२०१६** | **सन्दर्भग्रन्थः - निर्णयसिन्धुः ( तृतीयपरिच्छेदः )** | |

**॥ प्रथमान्वितिः ॥**

**प्र-१ कस्याप्येकस्य ससन्दर्भं व्याख्या कार्या ।** **०४**

१. रोगीपतिव्रतादुःखी पुत्रिणी भोगभागिनी ।
पतिव्रताक्लेशभागी सूर्यवारादिषु क्रमात् ॥

२. चतुर्थे मासि षष्ठे वाप्यष्टमे गर्भिणी यदा ।
यात्रा नित्यं विवर्ज्यास्यादाषाढे तु विशेषतः ॥

**प्र-२ ( १ ) सीमन्तसंस्कारः विशदतया चर्चयत ।** **१२**

**अथवा**

**( २ ) नामकर्मनिष्क्रमणसंस्कारयोः प्रतिपादनं ग्रन्थोक्तदिशा कुरुत ।**

**प्र-३ प्रदत्तेषु द्वयोः प्रश्नयोः उत्तरं ददत ।** **०४**

१. कर्णवेधः कदा कथं च दर्शयत ।

२. मूलनक्षत्रे जन्म भवति चेत् किं फलम् ?

३. सूतिकास्नानं चर्चयत ।

**॥ द्वितीयान्वितिः ॥**

**प्र-४ एकस्य ससन्दर्भं व्याख्यां कुरुत ।** **०४**

१. गर्भाष्टमेष्टमेवाब्दे पञ्चमे सप्तमेऽपि वा ।
द्विजत्वं प्राप्नुयाद्विप्रो वर्षेत्येकादशे नृप ॥

२. मधुमांसांजनोच्छिष्टं शुक्लस्त्रीप्राणिहिंसनम् ।
भास्करालोकनाश्लीलपरिवारादि वर्जयेत् ॥

**प्र-५ कस्याप्येकस्योत्तरं विस्तरेण दीयताम् ।** **०८**

१. उपनयनसंस्कारः समहत्त्वं वर्णयत ।

२. ब्रह्मचारिधर्माः विशदतया चर्चयत ।

**प्र-६ त्रयाणाम् एकैकवाक्येषु उत्तराणि यच्छत ।** **०३**

१. आश्वलायनमते क्षत्रियाणाम् उपनयनसंस्कारः कतमे वर्षे योग्यः ?

२. कस्योपवीतं विप्रैः धारणीयम् ?

३. उपवीते कति तन्तुदेवतानामावाहनं भवति ?

४. वेदारम्भात् पूर्वं कः संस्कारः अनिवार्यः ?

५. केषां विवाहपूर्वं छुरिकाबन्धनं भवति ?

**॥ तृतीयान्वितिः ॥**

**प्र-७ एकस्य पद्यस्य ससन्दर्भं व्याख्या कार्या ।** **०४**

१. पितापितामहो भ्राता सकुल्योजननी तथा ।
कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः ॥

२. मधुपर्कः प्रदातव्यो ह्यन्यशाखेपि दातरि ।
अत्र वरदातृशब्दो ऋत्विगाद्युपलक्षणम् ॥

**प्र-८ कस्याप्येकस्य वर्णनं कुरुत ।** **०८**

१. मधुपर्कसहितं विष्टरलक्षणं यथाधीतं प्रतिपादयत ।

२. गान्धर्वाद्यष्टौ विवाहाः सविस्तारेण चर्चयत ।

**प्र-९ त्रयाणां लघूत्तराणि यच्छत ।** **०३**

१. विवाहे काऽग्निः ?

२. भरद्वाजानां प्रवराः कति ? के च ते ?

३. विवाहप्रकाराः कति ?

४. वाशिष्टः कस्य प्रवरः ?

५. आत्रेयः कति ? के च ते ?

**॥ चतुर्थान्वितिः ॥**

**प्र-१० एकस्य पद्यस्य व्याख्यां कुरुत ।** **०४**

१. चैत्रे वा फाल्गुने वापि ज्येष्ठे वा माघवे तथा ।
माघे वा सर्वदेवानां प्रतिष्ठा शुभदा भवेत् ॥

२. आयुष्मान् बलवान् श्रीमान् पुत्रवान् धनवान् सुखी ।
वरमिष्टं लभेल्लिङ्गं पार्थिवं यः समर्चयेत् ॥

**प्र-११ कस्याप्येकस्य उत्तरं ददत ।** **१२**

१. पार्थिवपूजाविधिः समहत्त्वं यथाधीतं प्रतिपादयत ।

२. पञ्चायतनस्थापनप्रकाराः प्राणप्रतिष्ठाविधिः च यथाग्रन्थं वर्णयत ।

**प्र-१२ द्वयोः विवेचना कार्या ।** **०४**

१. दन्तधावनम् ।

२. शास्त्रधारणम् ।

३. शिवनिर्माल्यत्यागः ।

---